# तृतीयोऽध्यायः

- स्वामिनारायणभाष्यमाश्रित्य धारणायाः स्वरूपविमर्शः।
- स्वामिनारायणभाष्यमाश्रित्य ध्यानस्वरूपविमर्शः।
- स्वामिनारायणभाष्यमाश्रित्य समाधेः स्वरूपविमर्शः।
- स्वामिनारायणभाष्यमाश्रित्य संयमस्वरूपविमर्शः।

# तृतीयोऽध्यायः

**स्वामिनारायणभाष्यमाश्रित्य धारणायाः स्वरूपविमर्शः -**

पातञ्जलयोगदर्शने तृतीयेपादे विभूतीनां वर्णनमस्ति, तत्र प्रथमं सूत्रमस्ति- देशबन्धश्चित्तस्यधारणा।[217] इयं धारणा योगाङ्गानां अन्तरङ्गसाधनमस्ति। श्रीकृष्णवल्लभाचार्यः स्वामीनारायणभाष्यानुसारं "**धारणा**" - **यत्र देशे ध्येयं चिन्तनीयं तत्र ध्यानाऽऽधारदेशविषये चित्तस्य यो बन्धः सैव धारणा, स्थूलसूक्ष्मादि किमपि विषयस्वरूपं करणवृत्तिषु धार्यं यत् सा धारणा इत्युच्यते।**[218] धारणायाः अपरा व्याख्याऽपि वर्त्तते - धार्यते चित्ते लक्ष्यभूतं वस्तु यस्यां सा धारणोच्यते। अस्यां क्रियायां विषयसम्बन्धिनो दोषाः सर्वेऽपि निर्मूला भवन्ति, चित्तं सर्वथान्तर्मुखं भवति, साधकाः साधनां कुर्वन्तो महत्त परिश्रमेण इमां स्थितिं प्राप्नुवन्ति। इतः पूर्वं चित्ते किमपि वस्तुस्थितिं करोति चेत् सा स्थितिश्चञ्चलता अस्थिरा च भवति। विषयस्यानुभवस्य दाढ्र्यं नायाति। अस्यां स्थितौ साधकः समुद्रप्रवाहे वाताहता नौरिव भवति। साधकाः साध्यस्यप्राप्तेर्मध्येमार्गाद् विरमन्ति विरलाः केचन एव लक्ष्यं प्राप्नुवन्ति। अनयैव

---

217 पातञ्जलयोगदर्शनम् 3/1

218 योगदर्शनस्वामिनारायणभाष्यम् पृ. 262

धारणया साधकस्य लक्ष्येण सह द्रढीयान् सम्बन्धः संजायते। अतोऽस्या धारणायाः योगाचार्याणां महति आवश्यकता भवति। योगस्य षष्ठमिदमङ्गं बहुषु शास्त्रेषु विशेषतोव्याख्यातमस्ति।

योगवार्तिकानुसारं चित्तस्य सर्वेभ्यो विषयेभ्यः अपसार्य कस्यापि स्थानाविशेषे स्थापनमेव धारणाया लक्षणम्।

**यत्र देशे ध्येयं चिन्तनीयं तत्र ध्यानाधारदेशविषये चित्तस्य स्थापनं तदैकाग्रयं धारणा।**[219]

महर्षिव्यासमतानुसारं चित्तस्य नाभिचक्रे, हृदयपुण्डरीके, मूर्ध्निज्योतिषि, नासिकाग्रे, जिह्वाग्रे इत्यादिषु शरीरप्रदेशेषु बाह्यविषयेषु वा वृत्तिमात्रबन्धनं स्थिरीकरणं वा धारणेति।

**नाभिचक्रे, हृदयपुण्डरीके, मूर्ध्नि योतिषि, नासिकाग्रे, जिह्वाग्रे इत्यादिषु देशेषु बाह्ये वा विषये चित्तस्य वृत्तिमात्रेण बन्ध इति धारणा।**[220]

कविकुलगुरुकालिदासविरचित रघुवंशमहाकाव्येऽपि धारणाशब्दस्यार्थः स्मरणशक्तिः, मनसः शान्तिः, श्वासस्यावरोधनं, मनसः दृढभावमग्नता एव धारणा स्वीकृता ।

**परिचेतुमुपांश धारणा।**[221]

---

[219] योगवार्तिकम् पृ. 181

[220] व्यासभाष्यम् पृ. 277

[221] रघुवंशमहाकाव्यम् 8/18

स्वामिनारायणभाष्ये धारणायामेव षट्चक्राणां विवरणं प्राप्यते। एतेषां चक्राणां सूक्ष्मकेन्द्राणां च उपयोगः कुण्डलिनीजागरणे एव भवति।

योगग्रन्थेषु एतदर्थं चक्रभेदनोपायरूपेण बन्धाः, मुद्राः, ध्यानाभ्यासादयश्च सम्यक् वर्णिताः, यतो हि एतेषां स्थितिः शरीरे कुत्र केन रूपेण विद्यते इति ध्यानाभ्यासनैव महर्षिभिः साक्षात्कृता। एतानि चक्राणि दिव्यचेतनायाः केन्द्राणि। एतेषां स्थितिः मेरूदण्डस्याऽन्तर्भागे सुषुम्नायां वर्ण्यते।

तत्र **प्रथमम्** – योनिपीठे मूलाधारनामकं चक्रं चतुर्दलकमलं विद्यते, तत्र गणेशदेवस्वरूपे धारणां विदध्यात्। मूलाधारपद्मं योनिपीठे स्थितं सुषुम्णाया आस्ये संलग्नं कन्दमूलसुषुम्णयोः सन्धिस्थानसंलग्नपत्रं लिङ्गमूलादधोऽवधिसन्निवेशम् अपानस्थानाऽऽरूढं रक्तवर्णचतुर्दलमधोमुखं व-श-ष-स-इतिवेदवर्णैर्युक्तं विद्यते, एतत्पद्मस्य कर्णिकायां चतुष्कोणरूपं पृथिवीमण्डलं पीतवर्णमष्टदिग्व्यापिप्रकाश-वदष्टसूक्ष्मशिखरैर्युक्तं वर्त्तते तद्धरामण्डलस्य मध्ये धरायाः स्वबीजं सानुस्वारलकारः -(लं) इति समास्ते, एतद्बीजमपि पीतवर्णं द्विबाहु वज्रहस्तं गजेन्द्राधिरूढं वर्त्तते, तद्धराबीजस्याङ्केगणाधिपतिः विराजते। अथ सुषुम्णाया मुखाद् व्यङ्गुलोर्ध्वं लिङ्गमूलादधो वज्राया मुखमस्ति, तच्च मूलाधारकमलकर्णिकामध्यस्थगह्वरान्तर्वर्त्तते, तत्र मुखे विद्युत्प्रकाशं मदनस्याऽधिष्ठानं कन्दर्पनामवायोर्निवासस्थानं रक्तवर्णं कोटिसूर्यप्रकाशं 'त्रिकोण' विद्यते, तत् त्रिकोणमध्ये 'स्वयम्भू' नामकशिवलिङ्गं विद्यते, तच्च तप्तकाञ्चनाऽवयवकोमलम् अधोमुखं सरिदावर्त्तरूपाऽऽकृति वर्त्तते,

तच्च ज्ञानेन निर्गुणरूपप्रकाशं ध्यानेन सगुणरूपप्रकाशमनुभूयते-इति। तत्स्वयंभूशिवादूर्ध्वं बिसतन्तुसदृशी सूक्ष्मा जगन्मोहिनी स्वमुखेन ब्रह्मद्वारमुखं छादयन्ति स्वयमेवाऽमृतं पिबन्ती शङ्खस्य वेष्टनाऽऽकारतुल्या नवीनविद्युद्रेखासमप्रकाश सुप्तसर्पवत्कुण्डलिताऽऽकारा स्वयम्भूशिवस्योपरि सार्धत्रिवृताऽऽकृतिर्मधुरं शब्दं कुर्वती 'कुण्डलिनी' वर्त्तते, एतत्कुण्डलिनीजन्यः शब्दः कण्ठताल्वाद्यभिघातेन वैखरीरूपे प्रसरतीति। कुण्डलिन्या ऊर्ध्वे परमा शक्तिरास्ते, पर आत्मा मीयतेऽनया-इति परमा, तस्या मध्ये परापश्यन्तीमध्यमावैखरीबीजरूपा आनन्दपरम्पराः वर्तन्ते, परमायाः शक्तेर्भासया ब्रह्माण्डस्याऽऽदिकटाहपर्यन्तं सकलं भासते, सा च नित्यज्ञानप्रदा भवतीति। कन्दमूलादारभ्यैतत्परमाशक्तिपर्यन्तं सर्वं मूलाधारचक्र-सत्ताकमस्ति, तत्सर्वं ध्यात्वा योगी वाचामीशो नराणामिन्द्रः सर्वविद्याविनोदी नित्यमहानन्दविशिष्टात्मा च भवतीति।

**द्वितीयम्** – लिङ्गमूले 'स्वाधिष्ठान' नामकं चक्रं षट्दलकमलं विद्यते तत्र ब्रह्मदेवे धारणां कुर्यात्। 'स्वाधिष्ठानं' चक्रं लिङ्गमूलप्रदेशस्थं सिन्दूरवर्णं सुषुम्नागत ब्रह्मनाड्यादिमध्यगतं व-भ-म-य-र-ल इतिषड्वर्णयुक्तषडदलयुतं विद्युत्प्रभं पद्ममस्ति, तस्य मध्ये शुक्लवर्णमर्धचन्द्रयुक्तं मकराधिरूढम् अम्भसि जातं 'वरुणस्य मण्डल' मास्ते, तच्च सानुस्वारवकारस्य (वं) इत्यस्य बीजमस्ति, तद्बीजस्य मध्ये प्रभातसूर्यसमकान्तिः सृष्टिकारी चतुर्बाहुश्चतुर्मुखो दण्डकमण्डल्वक्षसूत्राऽभयहस्तो ब्रह्मा, रक्तवर्णसावित्रीसहितो विराजत इति। अत्र चक्रे ध्यानफलमुक्तं

षट्चक्रनिरुपणे- "स्वाधिष्ठानाख्यामेतत् सरसिजममलं चिन्तयेद् यो मनुष्यस्तस्याऽहङ्कारदोषाधिकसकलरिपुः क्षीयते तत्क्षणेन। योगीशः सोऽपि मोहाद्भूततिमिरचये भानुतुल्यप्रकाशो गद्यैः पद्यैः प्रबन्धैर्विरचयति" इति।

**तृतीयम्** – नाभिप्रदेशे 'मणिपूरक' नामकं चक्रं दशदलयुतकमलं विद्यते तत्र विष्णुधारणां सम्पादयेत्। मणिपूरकं चक्रं स्वाधिष्ठानादूर्ध्वं नाभिमूले वर्त्तते, तच्च अर्धचन्द्रकृष्ण वर्णबिन्दुसहित-ड-ढ-ण-त-थ-द-ध-न-प-फ इतिदशवर्णयुक्तदश-दललसितमस्ति, तस्य कर्णिकायां त्रिकोणाकारं त्रिकोणावच्छिन्नस्वस्तिकायुक्तं रक्त-वर्णं वह्निमण्डलं वर्त्तते, तन्मध्ये (रं) इति सानुस्वाररकारो वह्निबीजं रक्तवर्णं मेषाधिरूढं चतुर्भुजं वज्रशक्तिवराऽभयधरं विद्यते, तत्र बीजकोषे विष्णुर्गरुडवाहनः शंखचक्रगदापद्मधारी नीलप्रकाशमनोज्ञकान्तिः पीतवस्त्रः प्रथमयौवनगर्वहारी वनमालाश्रीवत्सचिह्न कौस्तुभधरश्चतुर्हस्तो दिव्याम्बराऽऽभरणविभूषितमत्तचित्तया लक्ष्म्या सहितो विराजत इति।

**चतुर्थः** - हृदयप्रदेशे 'अनाहतनामकं' द्वादशदलयुतकमलं विद्यते तत्र रूद्रे धारणां निवर्तयेत्। अनाहतचक्रं हृदि बन्धुककान्त्युज्ज्वलं सिन्दूराभसबिन्दु क-ख-ग-घ-ङ-च-छ-ज-झ-ञ-ट-ठ इतिद्वादशवर्णयुक्तद्वादशदलं कल्पवृक्षतुल्य-वाञ्छितप्रदं वर्त्तते, तत्कर्णिकायां धूमाभं षट्कोणाकारवायुमण्डलं वर्त्तते, तदुपरि सूर्यमण्डलमस्ति, तन्मध्ये विद्युत्कोटिनिभं त्रिकोणं वर्त्तते, तन्मध्ये (यं) इति वायुबीजं कृष्णसाराधिरूढं धूमधूम्राभं चतुर्भुजं अङ्कुशहस्तं वर्त्तते, अत्र कर्णिकायां रुद्रो

वृषारूढो रक्तवर्णो द्विभुजो वराभयधारी भस्मशुक्लस्त्रिनेत्रः सृष्टिसंहर्ता विराजते, तत्र च नीलवर्णा त्रिवक्त्रा त्रिनेत्रा चतुर्भुजा रुद्राणी शक्तिर्विराजते। एतत्कर्णिकाया अधो रक्तवर्णोर्ध्वमुखाष्टदलपद्ममस्ति तत्र कल्पवृक्षरत्नवेदीचन्द्रातपपताकाद्यलंकृतं मानसपूजास्थानमस्तीति, अनाहतचक्रं ध्यात्वा योगीशो ज्ञानीशो जितेन्द्रियः काव्याम्बुधारावहश्चेत्यादिर्भवतीति।

**पञ्चमम्** – कण्ठप्रदेशे 'विशुद्ध' नामकं चक्रं षोडशदलयुतकमलं विद्यते तत्र सदाशिवस्वरूपे धारणां समासादयेत्। विशुद्धनामकं चक्रं कण्ठमूले षोडशदलं धूमधूम्ररूपम् आरक्तकेशरं रक्तवर्णसबिन्दुकषोडशस्वरयुक्तं वर्त्तते, तत्कर्णिकायां नभोमण्डलं वृत्तरूपं शुक्लवर्णं वर्त्तते, तन्मध्ये त्रिकोणमस्ति, तत्र चन्द्रमण्डलं राजते, तदुपरि (हं) इति नभोबीजं शुक्लवर्णं, शुक्लाम्बरपरिधानं शुक्लगजारूढं चतुर्भुजं पाशाङ्कुशवरऽउभयधरं वर्त्तते, तन्मध्ये वृषभोपरि स्थितमहासिंहासने सदाशिवोऽर्धनारीश्वरत्वादर्धांगसुवर्णाभाऽर्धांगशुक्लाभः पञ्चवक्त्रस्त्रिनेत्रो दशभुजः शूल-टंक-खड्ग-वज्र-दहन--नागेन्द्र-घण्टाङ्कुशपाशाऽभययुक्तदशहस्तो व्याघ्रचर्माम्बरो भस्मलिप्तसर्वाङ्गो नागहारशोभितः सुधास्राव्यधोमुखार्धचन्द्रशेखरो विराजते। एतत्कर्णिकायां चन्द्रमण्डलमध्ये सिंहोपरिस्थिता 'पार्वतीशक्तिः' सात्त्विकी देवी शुक्लवर्णा चतुर्भुजा पाशांकुशधनुःशरकरा पीताम्बरा चञ्चवक्त्रा त्रिनेत्रेति विराजते, एदेतत्कमलं निर्वाणमुक्तिद्वारमिति गीयते योगिभिः, अत्र च 'बुद्धिशक्तिः' चतुर्भुजा

श्वेतवर्णा वेदहस्ता विराजते, तत्र च तदध: स्थितदीपज्योत्याकारहंसरूपी जीवात्मा विराजते, अत्र चित्तधारणाद् त्रिकालदर्शी चिरञ्जीव्यादिर्भवति।

**षष्ठम्** – भ्रूमध्यप्रदेशे 'आज्ञाचक्रं' नामकं द्विदलकमलं विद्यते तत्र विद्याशक्तिसहितपरमहंसगुरुदेवतायां धारणां कुर्यात्। आज्ञाचक्रं भ्रकुटिप्रदेशे शुभ्रं कर्बूरवर्ण-ह-क्षेत्यक्षरद्वययुक्तद्विपत्रं वर्त्तते, तत्कर्णिकायां चक्राधिष्ठात्री शक्ति: शुक्लवर्णा श्वेतषड्वक्त्रा त्रिनेत्रा षड्भुजा वराऽभयाऽक्षमालावेदाङ्गविद्यापुस्तकधरा शुक्लपद्मोपरिस्थिताऽस्ति। एतत्पद्मस्य त्रिकोणे प्रणवाऽऽकृतिरन्तरात्मा प्रदीपाऽऽभाज्योतिर्वर्त्तते, तस्य चतुर्दिक्ष्वन्तरीक्षे ज्योति:स्फुलिङ्गबिम्बैर्वेष्टितो ज्वलद्दीपसदृशेन स्वतेजसा मूलाधारादिब्रह्मरन्ध्रान्तप्रकाशकोऽस्ति, तदूर्ध्वं चन्द्रमण्डले हंसक्रोडे परमहंसगुरुदेवताख्यं गुणातीतानन्दं मूलाक्षरं ब्रह्म सशक्तिकं राजते। आज्ञाचक्रे ध्याताऽष्टसिद्धिमान् जन्मस्थितिलयकर्तेत्यादिर्भवतीति। एतच्चन्द्रमण्डले चन्द्रार्धस्तदुपरि मकरास्तदुपरि प्रणवस्तदुपरि नाद इति। इह मण्डले चित्ते लीने सति परमगुरुसेवालभ्यां निरालम्बां मुद्रां बध्वा योगी प्राणजीवबुद्धिनां कला: पश्यतीति, उक्तं च षट्चक्रनिरूपणे – ज्वलद्दीपाकारं तदनु च नवीनार्कबहुलप्रकाशं ज्योतिर्वागगनधरणीमध्यमिलितम्। इह स्थाने साक्षाद्भवति भगवान् पूर्णविभवोऽव्यय: साक्षी वह्ने: शशिमिहिरयोर्मण्डल इव। इह स्थाने विष्णोरतुलपरमामोदमधुरे समारोप्य प्राणं प्रमुदितमना: प्राणनिधने। परं नित्यं देवं पुरुषमजमाद्यं त्रिजगतां पुराणं योगीन्द्र: प्रविशति च वेदान्तविदितम्।

**सप्तमम्** – ब्रह्मरन्ध्रप्रदेशे 'सच्चिदानन्दब्रह्म' नामकं सहस्रारकमलं विद्यते तत्र परब्रह्मस्वरूपं धारयेत्। सहस्रदलकमलं उक्तमहानादादूर्ध्व महाशंखिन्याश्च शिखरसमदेशे शून्यनिरालम्बे विसर्गः अस्याऽधः प्रकाशरूपं पूर्णचन्द्रशुभ्रमधोमुखं केवलानन्दरूपम् अकारादिपञ्चाशद्वर्णैर्विंशतिप्रकारेण परिलसितदलं तत् समाप्ते, उक्तं च "इन्दुर्ललाटदेशे च तदूद्धर्वे बोधिनी स्वयं। तदूद्धर्वे भाति नादोऽसावर्धचन्द्राकृतिः परः।। तदूद्धर्वे च महानादो लाङ्गलाकृतिरुज्वलः। तदूद्धर्वे च कला प्रोक्ता 'आञ्जी'तियोगिवल्भा।। उन्मनी तु तदूद्धर्वे च यद्गत्वा न निवर्तते।" प्रथममूर्द्धपदं आज्ञाचक्रोद्धर्वबोधकमिति। सहस्रदलकमलमध्ये शशरहितः सम्पूर्णश्चन्द्रः स्फूरत्ज्योत्स्नाजालः समास्ते। चन्द्रमध्ये विद्युत्प्रभं त्रिकोणं विद्यते त्रिकोणमध्ये सकलसुरगणैः सेवितं गुह्यं 'शून्याकारं' वर्त्तते। तद् ब्रह्मात्मकशून्याकारात् परमममृतं क्षरति, तदिह स्थाने परं ब्रह्म निवसति, स भगवान् निर्मलमतये योगिने स्वात्मज्ञानं दिशति, च स परमात्मा बहुनाम्ना प्रसिद्धः, कैश्चिद् गुरुरिति मन्यते, उक्तं 'पुरश्चरणसोल्लासे पादुकापंचकग्रन्थटीकायाम् श्रीमहादेव उवाच- सहस्रारे ततो नित्ये पङ्कजे परमाद्भुते। पद्मस्य बीजकोषे तु भावयेत् स्वगुरुं सदा'। श्रीपार्वत्युवाच-'सहस्रारे महापद्मे सदा चाऽधोमुखे प्रभो! गुरुस्थितिः कथं देव! सततं वद निश्चयम्'।। श्रीमहादेव उवाच – 'श्रृणु प्रिये! प्रवक्ष्यामि यदेतत्पृष्ठमुत्तमम्। सहस्रारं महापद्मं सहस्रदलसंयुतम्।। सदा 'ब्रह्म' पुरं तत्तु नित्यानन्दमयं सदा नानागन्धयुतं पद्मं 'सहजानन्द' मन्दिरम्।। सदा चाऽधोमुखं पद्मं बीजमूर्ध्वमुखं सदा। त्रिकोणाकाररूपेण

कुण्डलीसंयुतेन चेत्यादि'। इदं ब्रह्मरन्ध्रस्थं सहस्रदलकमलं केचित् 'शिवस्थानं शैवाः परमपुरुषं वैष्णवगणा वदन्तीति प्रायो हरिहरपदं केचिदपरे। परं देव्या देवीचरणयुगलाम्भोजरसिका मुनिन्द्रा अप्यन्ये प्रकृतिपुरुषस्थानममलम्'।।

अत्र सहस्रदलचक्रे चन्द्रस्य प्रसिद्धा अमानाम्नी षोडशी कला विद्यते, सा च शुद्धाऽतिसूक्ष्मा क्षयोदयरहिताऽधोमुखी विद्युत्प्रकाशा पीयूषधाराधराऽस्तीति, तस्या मध्यभागे निर्वाण नाम्नी कला सूक्ष्मतरा भूतानामधिदेवतारूपा नित्यबोधोदया द्वादशादित्यप्रभा चन्द्रलेखेव भङ्गुरा समास्ते। निर्वाणकलाया मध्ये निर्वाण नाम्नी शक्तिरास्ते सा च परब्रह्मशक्तिरूपा कोटिसूर्यप्रकाशा त्रिभुवनजननी सूक्ष्मतमा प्रेममयी मुनिमनःसु तत्त्वज्ञानं वहन्ती विद्यते, तस्या मध्ये परब्रह्मपदं नित्यानन्दं शाश्वतं सकलसुखमयमास्ते। केचित् तच्छिवपदमिति, अन्ये विष्णुपदमिति, अपरे मोक्षप्रदं हंसपदमित्यादि वदन्ति।। तदयं क्रमः - योगी विहितासने समुपविश्य स्वाङ्के उत्तानौ करौ कृत्वा खेचरीमुद्रया स्थितिचित्तः सन् देहान्तर्वायुमापूर्य्य कुम्भकं कृत्वा हृदयमाकुञ्चयेत् तेन ऊर्ध्वोच्छ्वासोत्सरणनिवृत्तिः, ततो देहान्तरस्थवायोरुदरकण्ठादिव्यापकतया नाडीच्छिद्रप्रस्फोटनेनाऽधोगमनमनुभूय गुदमाकुञ्चयाऽपानं संरुध्य वायुमुत्तोल्य मूलाधारकमलकणिकान्तस्त्रिकोणस्थं कामदेवं वाममावर्त्तयेत्, तेनोद्दीप्तेन तत्र स्थितेन कामाग्निनोत्तप्तां कुण्डलिनीं हूंकारबीजेन पवनवेगेन दहनस्योर्ध्वगमनद्वारा चेतयित्वा ऊर्ध्वगतिमतीं कृत्वा परब्रह्माभिलाषिणीं तां स्वयम्भूलिङ्गमुखं स्फोटयित्वा तच्छिद्रेण नाडीमुखमध्यं प्रापयेत्, ततः सा

सकलचक्राणि भित्त्वा ब्रह्मरन्ध्रे देदीप्यते, तां योगी जीवात्मना सार्धैलीनां कृत्वा परब्रह्मण: स्थाने नीत्वा ध्यायेत्, तत: सा परब्रह्मण: परमामृतं पीत्वा पुनस्तेनैव मार्गेण मूलाधारचक्रस्थले समागच्छतीति, तदेतावत्पर्यन्तं क्रियासिद्धिवान् योगी योगफलं प्राप्त एव नास्याधिकं वेदितव्यमवशिष्यते।। परमात्मन: स्थाने प्राणारोपणप्रकारश्चेत्थम् स्वप्राणवियोग कालं ज्ञात्वा परे ब्रह्मणि लीनो भंवामीत्यानन्दितमना योगासनमासीन: सन् कुम्भकेन वायुं संरुध्य हृदिस्थं जीवत्मानं मूलाधारमानीय गुदमाकुञ्च्य यथोक्तविधानेन कुंडलिनीमुत्थाप्य मूलाधारादिब्रह्मरन्ध्रान्तं तडिदाकारमानन्दं कुण्डलिनीमयं सूत्ररूपं नादं ध्यात्वा प्राणरूपश्वासप्रणवात्मकं हंसं तन्नादे विलाप्य जीवेन सह चक्रभेदक्रमेणाऽऽज्ञाचक्रमानीय तत्र स्थितायां कुण्डलिन्यां स्थूलसूक्ष्मक्रमात् पृथिव्यादिप्रपञ्चसमुदायं विलाप्य तां पुनर्जीवात्मना सह तत्र स्थितविद्याशक्तिमयबिन्दुनैक्यभावमापाद्य तिष्ठेत्, ततो ब्रह्मरन्ध्रभेदेन देहं त्यक्त्वा ब्रह्मणि लीनो भवेदिति।। तदेतादृशचक्रेषु तद्देवतासु कर्णिकासु त्रिकोणधिदेवेषु शक्तिषु वा यत्र कापि ध्यानं कुर्यात्। एवं नासिकाऽग्रे गन्धसंविदं धारयेत्, जिह्वाग्रे रससंविदं धारयेत्, ताल्वग्रे रूपसंविदं धारयेत्, जिह्वामध्ये स्पर्शसंविदं धारयेत्, जिह्वामूले शब्दसंविदं धारयेत्, इत्येवं शरीरान्त: प्रदेशे यत्र कुत्रापि धारणां विदध्यादिति।

अथायं षट्चक्रस्थितिप्रकार: उक्त: 'षट्चक्रनिरूपणं' तदनुसारेण संक्षेप इत्थम्- शरीरे पृष्ठभगे मूलाधाराऽवधिको ग्रीवान्त: पृष्ठाऽस्थितविशेषो मेरुरिति ख्यात:, तस्य सव्यभागे-'इडा' नाडी दक्षभागे च 'पिङ्गला' वर्तते, मेरोर्मध्ये तु 'सुषुम्णा' नाम्नी

नाडी वर्तते। सा च मूलाधाराद् ब्रह्मरन्ध्रगा, कन्दमूलादारभ्य शिर:स्थिताऽधोमुखसहस्रदलकमलकर्णिकावर्तिद्वादशदलपङ्कजाऽध:पर्यन्तस्थितेत्यर्थ:।

सहस्रदलकमलं सुषुम्णारहिते शून्यप्रदेशे ब्रह्मरन्ध्रसमवहितं विद्यते इति, इडापिङ्गले च मूलाधारादारभ्याऽऽज्ञाचक्रान्तं प्राप्य त्रिग्रन्थनवेणीबन्धक्रमेण सर्वचक्राणि संवेष्ट्य भ्रूमध्याद्वेणीबन्धरूपेण नासारन्ध्रमिलिते इति। "गुदात्तु द्यङ्गुलादूर्ध्व: मेढ्रात्तु द्यङ्गुलादध:। चतुरङ्गविस्तारं कन्दमूलं (मूलाधारं) खगाण्डवत्। नाड्यस्तस्मात् समुत्पन्ना सहस्रणां द्विसप्तति" रिति। मेरुमध्यवर्तिसुषुम्णाया अन्त:स्थिता 'व्रजा' नाम्नी नाडी विद्यते, सा च मेढ्रदेशात्। शिरसी परिणताऽस्ति सुषम्णाया: किञ्चद् ह्रस्वाऽस्ति, अथ 'वज्राया' मध्ये 'चित्रिणी' नाम्नी नाडी वर्तते सा लूतान्ततूपमेया सकलमूलाधारादीन् सुषुम्णावज्रासंलग्नान् चक्रविशेषान् भित्वा चक्राणां ग्रन्थनरचनया देदीप्यते, अथ च चित्रिण्या मध्यवर्तिनी 'ब्रह्म' नाडी वर्तते, सा च कन्दमूलाऽऽज्ञाचक्रयोर्मध्यदेशे स्थिता विद्युत्प्रकाशाऽतिसूक्ष्मा परब्रह्मद्वारभूताऽस्तीति, ब्रह्मनाड्या मुखमेव सुषुम्णाया ग्रन्थिस्थानमिति नाडीव्यवस्था।

इदं शरीरविज्ञानं भगवता स्वामिनारायेण योगपिपासूनां समक्षं प्रस्तुतम्। इत्थं षट् चक्रज्ञानं योगवार्तिके, व्यासभाष्ये, तत्त्ववैशारद्यां नैव प्राप्यते, अतएव अनुसंधानरीत्या धारणाया: विशिष्टस्वरूपं स्थानविशेषञ्च दैवसहितम् अत्र वैशिष्ट्यरुपेण उपस्थाप्यते।

**स्वामिनारायणभाष्यमाश्रित्य ध्यानस्वरूपविमर्शः -**

ध्यै धातो ल्युट् प्रत्ययान्निष्पन्नोऽयं ध्यानशब्दः। यस्यार्थः मननं, विमर्शः, विचारः, चिन्तनमिति च। सर्वप्राणिषु विद्यमानस्य परोक्षदोषस्य विनाशाय विभिन्नेषु शास्त्रेषु योगदर्शनं प्रमुखतया विद्यते। श्रवणेन असम्भावनादोषः प्रतिहन्यते, श्रवणानन्तरमेव श्रोता श्रुते परमतत्त्वे सम्यक्तयाऽस्थावान् भवति। मननेन तर्कप्रधानशास्त्राभ्यासेन विपरीतभावना प्रणश्यति। प्रणष्टायां विपरीतभावनायामपि चरमोदोषः पारोक्ष्यं बज्रलेपायते। एतस्य बज्रलेपस्य स्फोटनं केनचिच्छास्त्रेण भवति चेत् तच्छास्त्रमस्ति योगः। अस्य योगस्याष्टाङ्गस्य परिशीलनेन तत्राऽपि ध्यानस्याभ्यासेन साक्षात्कृते परमार्थे परोक्षदोषः सन्देहप्रदो विलीयते। सर्वथा सर्वदा इष्टदेवस्य आत्मनः परमात्मनश्च साक्षात्कारः एव भवतीति। योगदर्शनं सम्यक्दर्शनमस्ति। सर्वप्राणिषु विद्यमानस्य परोक्षदोषस्य विनाशाय विभिन्नेषु योगदर्शनं प्रमुखायते। श्रवणेन असम्भावनादोषः प्रतिहन्यते, श्रवणानन्तरमेव श्रोता श्रुते परमतत्त्वे सम्यक्तयाऽस्थावान् भवति। मननेन तर्कप्रधानशास्त्राभ्यासेन विपरीतभावना प्रणश्यति। प्रणष्टायां विपरीतभावनायामपि चरमोदोषः पारोक्ष्यं बज्रलेपायते। एतस्य बज्रलेपस्य स्फोटनं केनचिच्छास्त्रेण भवति चेत् तच्छास्त्रमस्ति योगः। अस्य योगस्याष्टाङ्गस्य परिशीलनेन तत्राऽपि ध्यानस्याभ्यासेन साक्षात्कृते परमार्थे परोक्षदोषः सन्देहप्रदो विलीयते सर्वथा सर्वदा इष्टदेवस्य आत्मनः परमात्मनश्च साक्षात्कारः एव भवतीति योगदर्शनं

सम्यक्दर्शनमस्ति। श्रीकृष्णवल्लभाचार्यः स्वामिनारायणभाष्ये ध्यानस्य सप्तमस्य योगाङ्गस्य स्वरूपं प्रतिपादयन्ति -

**यत्र यत्र धारणा कृता भवेत् तत्र तत्र देशे, प्रत्ययस्य-चित्तवृत्तेः, एकतानता-एकाग्रता, तद्ध्यानं, ध्यायते स्थूलसूक्ष्मादि यत्किमपि स्वरूपं यत्र वृत्तिष्विति।**[222]

महर्षिः पतञ्जलिमतानुसारं यस्मिन् वस्तुनि धारणा तिष्ठति तद्वस्तु पूरयितुं साधनं ध्यानमेव। अत्र उभयोः नास्ति किमपि भेदः, उभयोः यत्र धारणा भवति तत्रैव ध्यानं स्वीकृतमस्ति।

**तत्र प्रत्यैकतानता ध्यानम्।**[223]

भाष्यकारेणापि वृत्यान्तसबाधितसदृशप्रवाहमात्रं ध्यानं स्वीकृतम्।

**तस्मिन् देशे ध्येयालम्बनस्य प्रत्यस्यैकतानता सदृशः प्रवाहः प्रत्ययान्तरेणापरामृष्टो ध्यानम्।**[224]

वाचस्पतिमिश्रस्यानुसारं एकतानता पदस्यार्थः 'एकाग्रता' अस्ति।

**एकतानतैकाग्रता।**[225]

योगसिद्धान्तचन्द्रिकाकारः ध्यानस्य विषये प्रतिपादयति -

---

222 योगदर्शनस्वामिनारायणभाष्यम् 3/2

223 पातञ्जलयोगसूत्रम् 3/2

224 व्यासभाष्यम् पृ. 219

225 तत्त्ववैशारदी 3/2

**तत्र हृत्पुण्डरीकादिदेशोपलक्षिते या प्रत्ययैकतानता प्रत्ययस्य चित्तवृत्तेर्विजातीयप्रत्ययतिरस्कारेण धारावाहिकता सा ध्यानमित्यर्थः। तच्च ध्यानं सगुणनिर्गुणभेदेन द्विविधम्।**[226]

मणिप्रभाकारस्यानुसारं विसदृशवृत्तेः निरोधकरणे यत्र 'धारणा' यत्नस्य अपेक्षा करोति तत्रैव 'प्रत्ययानां' अर्थात् वृत्तीनां यत्नरिपेक्षः यः 'एकतानता' अर्थात् एकविषयता भवति, तेन ध्यानमुच्यते।

**यत्र धारणा विजातीयवृत्तिपरिहारे यत्नापेक्षा भवति तत्र एव या प्रत्ययानां वृत्तीनामेकतानता यत्नमनपेक्ष्यैकविषयता तद् 'ध्यानम्' इत्यर्थः।**[227]

भास्वतीकारानुसारं तैलस्य सतत् प्रवाहमानधाराया अखण्डप्रवाहसंयुक्ता एकाग्रता तथा अन्य कस्यापि ज्ञानेन अमिश्रित सुसम्बद्धज्ञानधारा ध्यानमस्ति।

**धारणाऽऽयत्ते देशे ध्येयालम्बनस्य प्रत्ययस्य वृत्तेर्या एकाग्रता तैलधारावदेकतानप्रवाहः प्रत्ययान्तरेणापरामृष्टः अन्यया वृत्त्ययाऽसम्मिश्रः प्रवाहस्तद्ध्यानम्, एकैव वृत्तिरुदितेत्यनुभूतिरेकतानता।**[228]

भोजमतानुसारं चित्तवृत्तेः अन्यान् विषयान् प्रति गमनं कुर्वता धारणायाः अवस्थायां यं ध्येयपदार्थ आलम्बनं क्रियते, तस्य ध्येयपदार्थस्य निरन्तरेण धाराप्रवाहरूपेण प्रतीतिरेव ध्यानमस्ति।

---

226 योगसिद्धान्तचन्द्रिका पृ.-134

227 मणिप्रभा 3/2

228 भास्वती 3/2

**तत्र तस्मिन् प्रदेशे, यत्र चित्तं धृतं तत्र, प्रत्ययस्य ज्ञानस्य, या एकतानता विसदृशपरिणामपरिहारद्वारेण यदेव धारणायाम् अवलम्बनीकृतं, तदवलम्बनतयैव निरन्तरमुत्पत्तिः सा ध्यानमुच्यते।**[229]

योगवाशिष्ठस्य उपशमप्रकरणे महर्षिवशिष्ठो श्रीरामं योगसारं समुपदिशन् ध्यानं विशदयति कथयति च हे राम ! विविधशास्त्राणां सज्जनानां निरन्तरसम्पर्केण वैराग्यभ्यासेन च पूर्वसंसारवृत्तिषु पूर्व कृतास्थायामपि पश्चादनास्थायां जातायां केवलं यथाभिमतेष्टदेवाऽभिध्यानाच्चिरमेकतया समुदितादेकतत्वघनाभ्यासात् साधकस्य प्राणस्पन्दो निरूध्यते तत्कालं मोक्षस्य समुपतिष्ठते। यथा -

**शास्त्रसज्जनसंपर्कवैराग्याभ्यासयोगतः।**

**अनास्थायां कृतास्थायां पूर्वसंसारवृत्तिषु।।**

**यथाभिवांछितध्यानच्चिरमेकतयोदितात्।**

**एकतत्वघनाभ्यासात्प्राणस्पन्दो निरूध्यते।।**[230]

रघुवंशमहाकाव्ये स्वरूपं व्याप्तरूपं परमात्मनः वासुदेवस्य चिन्तनमेव ध्यानम्।

**चिन्तनं वासुदेवस्य परस्य परमात्मनः।**

**स्वरूपव्याप्तरूपस्य ध्यानं कैवल्यसिद्धिम्।।**[231]

---

229 भोजवृति 3/2

230 योगवाशिष्ठ 1/18-19

231 रघुवंशमहाकाव्यम् 1/73

अभिज्ञानशाकुन्तलेऽन्तर्ज्ञानमन्तर्विवेको वा कस्यापि देवस्याल्पोपाधिभूतं स्वस्य चिन्तनमेव ध्यानम्।

**तदैव ध्यानादवगतोस्मि।**[232]

[232] अभिज्ञानशाकुन्तलम् 1/7

**स्वामिनारायणभाष्यमाश्रित्य समाधिस्वरूपविमर्शः।**

समाधिशब्दः समुपसर्गात् 'धा' धातो 'कि' प्रत्ययो भूत्वा निष्पद्यते। यस्यार्थः एकत्रीकरणं, स्वस्थीभवनं, मनसः एकतानमिति। ध्यानस्य परं गतिर्नाम समाधिः। अष्टविधेषु योगाङ्गेषु समाधिः चरममङ्गमस्ति तल्लक्षणं प्रतिपादयन् श्रीकृष्णवल्लभाचार्यः बहूना यमादिनां स्वरूपाणि निरूक्तवान्। तत्र यमनियमासनानां बाह्यशरीरदोषनिवारकत्वं प्रतिपादितम्। प्राणायामप्रत्याहारधारणाध्यानानां विशेषतोऽन्तःकरणं परिशोधकत्वं प्रतिपादितवान्। केवलं शरीरस्य अन्तःकरणस्य च परिशोधनेन किं फलं जायते, इत्यपेक्षायां समाधिप्राप्तिरेव तेषां सेवनस्य फलमिति कथयित्वा सभेदं समाधेः स्वरूपं सम्यग् वर्णितमस्ति श्रीकृष्णवल्लभाचार्येण।

**ध्यानं प्रत्ययात्मकं यदा अर्थमात्रनिर्भासं-ध्येयविषयाकारेणैव साक्षिणी निर्भासते न तु प्रत्ययाकारेण, तदा 'अहमिदं चिन्तयामि' इत्येवं रूपस्य वृत्त्यन्तरस्योदयो न भवति, अतएव वृत्त्यन्तररहितं स्वस्य स्वरूपशून्यमिव भवति-ध्येयस्वरूपाकारमात्रं भवतीति, तदा ध्यानमेवेदृश्यवस्थाय समाधिरित्युच्यते, सम्यग् आधीयते ध्येयं यत्र वृत्तिविशेषे सः समाधिरिति, तथा च ध्यातृध्येयध्यानानीतिस्वरूपत्रयनिर्भासकं ध्यानम्, ध्यातृध्येयध्यानानीतिस्वरूपत्रयरहितः समाधिरिति।**[233]

233 योगदर्शनस्वामिनारायणभाष्यम् पृ. 268

महर्षिपतञ्जलिमतानुसारं निरन्तरमभ्यासेन पूर्वोक्तं ध्यानं यदा ध्येयमात्रस्य प्रकाशकं स्वध्यानाकारेण सादृश्यभिन्नं भवति तदा समाधिरुच्यते।

**तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः।**[234]

विज्ञानभिक्षुमतानुसारं समाधिः चित्तस्थैर्यस्य सर्वोत्कृष्टावस्था भवति, अतएव समाधिविशिष्टचित्तं ध्येयविषये एतादृशमनुरञ्जितं तिष्ठति सत्तस्य 'अहं जानामि' इत्यकारस्य ज्ञानं नैव भवति।

**चित्तस्य ध्येयस्वरूपावेशेनाहमिदं चिन्तयामीत्येवं**

**प्रत्ययाकारवृत्त्यन्तरानुदयात्।**[235]

परञ्चास्याभिप्रायोऽयं नास्ति यत् तत्र ज्ञानस्य स्थितिर्नैव विद्यते अर्थाद् ज्ञाने सत्यपि तस्य प्रतीतिर्न भवति। अन्यथा ध्येयपदार्थो निर्भासितो न स्यात्। यतोहि ध्येयस्य प्रकाशकज्ञानमेव तत्र तिष्ठति। अत एव सूत्रकारेण समाधिलक्षणसूत्रे 'इव' पदस्य प्रयोगेण समाधौ ज्ञानस्य शून्यावस्था निर्दिष्टा न परमार्थिकतया शून्यमिति।

हठयोगप्रदीपिकायां समाधिर्विषये उक्तं यत् समाधिस्थाः योगिनः मृत्युर्न भवति नैव च तस्य कर्मबन्धनम्। केनापि साधारणजनेन तस्य सुखदुःखयोरनुभूतिं नैव कारयितुं शक्यते यतोहि स तु समाधिस्थो जातः -

---

234 पातञ्जलयोगसूत्रम् 3/3

235 योगवार्तिक पृ. 284

**खाद्यते पञ्च कालेन बाध्यते न च कर्मणा।**

**साध्यते न स केनापि योगी युक्तः समाधिना।।[236]**

घेरण्डसंहिताकारो महायोगी घेरण्डः समाधेः स्वरूपं वर्णयन् कथयति यत् साधकः सर्वप्रथमं शाम्भवीं मुद्रा कृत्वा आत्मसाक्षात्कारं कुर्यात्, बिन्दुमयस्य ब्रह्मणः साक्षात्कारं कुर्वन् स्वमनोबिन्दो लयेत्, तत्पश्चात् मस्तके विद्यमाने ब्रह्मलोकमये आकाशे आत्मानं नयेत्, जीवाऽत्मानं चाऽकाशे मेलयेत् परमात्मनि च जीवात्मानं संयोजयेत् इयमेव योगिनोऽवस्था समाधिरूपाऽस्ति। उक्तं च घेरण्डमुनिना यथा -

**शाम्भवीं मुद्रिकां कृत्वा आत्मप्रत्यक्षमानयेत्।**

**बिन्दुब्रह्म सकृद्दृष्ट्वा मनस्तत्र नियोजयेत्।।**

**खमध्येकुरूचात्मानं आत्ममध्ये च खं कुरू।**

**आत्मानं खमयं दृष्ट्वा न किंचिदपि वाध्यते।**

**सदानन्दमयो भूत्वा समाधिस्थो भवेन्नरः।।[237]**

साधको यदा आनन्दमयो भूत्वा ब्रह्मणि ऐक्यं भावयेत् अहं ब्रह्मेति वा अद्वैतं भावयेत्, तदा समाधिः संजायते यदा वा साधकः मनोमूर्छा समाधाय तन्मन आत्मनि योजयेच्चेत् समाधाय तन्मन आत्मनि योजयेच्चेत् समाधिं प्राप्नोति। उक्तं च घेरण्डेन मुनिना यथा -

---

[236] हठयोगप्रदीपिका 4/108

[237] घेरण्ड संहिता 7/7,8

**आनन्दमयः सम्भूय ऐक्यं ब्रह्मणि संभवेत्।**

**अहं ब्रह्मेति वाऽद्वैतं समाधिस्तेन जायते।।**

**मनोमूर्च्छा समासाद्य मन आत्मनि योजयेत्।**

**परात्मनः समायोगात् समाधिं समवाप्नुयात्।।**[238]

स्वात्मारामयोगीन्द्रविरचितायां हठयोगप्रदीपिकायां समाधिस्वरूपं प्रतिपादयन् ग्रन्थकारो ध्यातृध्यानध्येयेषु यदा केवलमर्थाकारा ध्येयमात्रस्य प्रतीतिर्भवति, तदा चित्तस्य प्राप्ता साऽवस्था समाधिरूच्यते। अयं समाधिः मृत्युघ्नः, सुखोपायः परमो ब्रह्मानन्दकारो भवति। यथा-

**अथेदानीं प्रवक्ष्यामि समाधिक्रममुत्तमम्।**

**मृत्युघ्नं च सुखोपायं ब्रह्मानन्द करं परम्।**[239]

ग्रन्थकारो हि पुनः प्रकारान्तरेण समाधिस्वरूपं निर्वक्ति जले यथा सैन्धवं जलरूपं गृह्णाति तथेवात्ममनसारैक्ये समाधिः कथ्यते। यथा वा प्राणः क्षीयते मनश्च प्रविलीयते चेत् समरसत्ताप्राप्तौ समाधिः कथ्यते। यथा जीवात्मपरमात्मनोः सम्यकतया एकरूपत्वे सति नष्ट सर्वकल्पा स्थितिः समाधिरुच्यते। उक्तं च योगप्रदीपिकाकारेण -

---

238 घेरण्ड संहिता 7/13,16

239 योगप्रदीपिका 4/2

**सलिले सैन्धवं महत्साम्यं भजति योगतः।**

**तथात्ममनसोरैक्यं समाधिरभिधीयते।।**

**यदा संक्षीयते प्राणो मानसं च प्रलीयते।**

**तदा समरसत्वं च समाधिरभिधीयते।।**

**तत्समं च द्वयोरैक्यं जीवात्मपरमात्मनोः।**

**प्रणष्टसर्वसंकल्पः समाधिः सोऽभिधीयते।**[240]

योगस्य अष्टावङ्गानां बहिरङ्गान्तरङ्गश्च द्वे फले स्तः। प्रथमं सम्प्रज्ञातयोगः द्वितीयं असम्प्रज्ञातयोगश्च।

**अष्टानां चाङ्गानां फलद्वयं संप्रज्ञातयोगस्तद्द्वाराऽसम्प्रज्ञातयोगश्चेति।**[241]

सम्प्रज्ञाताऽसम्प्रज्ञातयोः योगः स्वीक्रियते। यथा उक्तं मणिप्रभाकारः -

**स एव दीर्घकालव्यापी सन् संप्रज्ञाताख्यो योग इत्युच्यते।**[242]

अस्य संप्रज्ञातयोगस्य विस्तृतं विश्लेषणमावश्यकं वर्त्तते।

---

240 योगप्रदीपिका 4/5-7

241 योगवार्तिक 3/3

242 मणिप्रभा 3/3

**सम्प्रज्ञातयोगः -**

**सम्यक् प्रज्ञायते साक्षात्क्रियते ध्येयमस्मिन्निरोधविशेषरूपे योग इति सम्प्रज्ञातो योगः।**[243]

वस्तुतः सम्प्रज्ञातयोगः चित्तस्य एकाग्रावस्थायाः नाम वर्त्तते किन्तु आलम्बन विषयभेदस्य कारणं अस्य सम्प्रज्ञातयोगस्य चत्वार्यङ्गानि वितर्कविचारानन्दास्मिता-ख्यानि प्रतिपादितानि श्रीकृष्णवल्लभाचार्येण -

**वितर्कविचारानन्दास्मितारूपानुगमात्सम्प्रज्ञातः।**[244]

वितर्कादीनां चतुर्णामन्यतमस्य यत्र विद्यमानता तत्र तदङ्गी सम्प्रज्ञातः, साक्षात्कारवि-शेषरूपैर्वितर्कादिभिरेव ज्ञापकैः अनुगमात् स्वव्यापकस्याऽङ्गिनो निश्चयात् सम्प्रज्ञात् इति।

**वितर्कसमम्प्रज्ञातः -**

विशेषेण तर्कणमवधारणं स्थूलस्येति वितर्कः।[245] तेन सहकृतो निरोधः सवितर्क इति। सवितर्कनिर्वितर्कौ चास्याऽवान्तरभैदो वक्ष्येते। तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्कासमापत्तिर्भवति। तत्र शब्दार्थज्ञानानां परस्परं यो पारमार्थिको भेदः स ज्ञातुं न शक्यते। अतः एतेषां सर्वेषां एकस्मिन् विषये मिश्रिता एकाकारएव बोधः

---

243 योगवार्त्तिक 1/1

244 योगदर्शनस्वामिनाराणभाष्यम् 1/17

245 योगदर्शनस्वामिनाराणभाष्यम् पृ. 85

जायते। निर्वितर्का समापत्तिश्च शब्दार्थज्ञानविकल्परहिता केवला स्मृतिपरिशुद्धत्वात् अर्थमात्रविषयिणी भवति।

**विचारसम्प्रज्ञातः -**

विशेषेण चरणं सूक्ष्मवस्तुपर्यन्तमिति विचारः। तेन सहकृतो निरोधः सविचार इति।[246] अस्यापि सविचारनिर्विचार भेदेन द्वौ भेदौ स्तः। यावत् देशकालनिमित्तैः सह परिलक्षितो भवति, तथा शब्दज्ञानादीनां तत्र यदा अनुभूतिर्भवति तदा सविचारः समाधि उच्यते। अत एव अभिव्यक्तवर्तमानकालिकधर्मसम्पन्नेषु देशकालनिमित्तज्ञान-विशिष्टेषु या समापत्तिर्जायते सा सविचारः समापत्तिः। एतद् विपरीतं सर्वथा भूतवर्तमानकाल निमित्तैः रहितं धर्माश्रयभूतानां धर्मिणां भूतसूक्ष्माणां केवलं तन्मात्रादिरूपेण धर्मरूपेण वा यदि भानं स्यात् तदा निर्विचारसमापत्तिः उच्यते।[247] कथनस्य तात्पर्यमिदमस्ति यत्र देशकालनिमित्तादीनां भानं न भवेत् केवलं अर्थमात्रस्यावभासः भवेत तदा निर्विचारः।

**आनन्दसम्प्रज्ञातः -**

सूक्ष्मपदार्थानपि विहाय इन्द्रियाणां सात्त्विकतया तत्कारणीभूतोऽहंकारोऽपि सत्त्वप्रधान आनन्दपूर्ण इति आनन्दे एव लक्ष्ये चित्तैकाग्रता सानन्द इति।[248]

साऽनन्दस्याऽवान्तरभेदो नास्ति।

---

246 योगदर्शनस्वामिनाराणभाष्यम् पृ. 85

247 योगामृतम् पृ. 133

248 योगदर्शनस्वामिनाराणयभाष्यम् पृ. 85

**अस्मितासम्प्रज्ञातः -**

तादृशानन्दमपि विहाय कारणीभूता बुद्धिरात्मना सहैकात्मा इव तिष्ठति तत्र तयोः संयोग एवाऽभेदाऽवभासकः, तादृशैकात्मकताऽभिधानायां संयोगात्मिकायां सूक्ष्मतमायां लक्ष्यीभूतायां यच्चित्तस्यैकाग्रता सः सास्मितासम्प्रज्ञात इति। अस्याऽवान्तरभेदो नास्तीति।[249]

अतः विवेकख्यातिरिति अस्मिन्नेव समाधौ जायते। एतासु सर्वासु समापत्तिषु निर्विचारसमापत्तिः सर्वोत्कृष्टा। तस्याः वैशारद्यं यदि लभ्यते तदा अध्यात्मप्रसादः जायते।[250] तेन प्रज्ञालोकः स्फुटो भवति। ऋतम्भरा प्रज्ञा च प्राप्यते। यतोहि सम्प्रज्ञातस्य फलं ऋतम्भरा प्रज्ञा एव। एतस्यामेव प्रज्ञायां विवेकख्यातिः जायते। समाधेः स्वरूपस्य अस्य सूक्ष्मभेदानां विस्तृतं विवेचनं योगिकग्रन्थेषु एव प्राप्यते नान्यत्र।

ऋतम्भरायां प्रज्ञायां योगिनः प्रज्ञाकृताः नवाः नवाः संस्कारा उत्पद्यन्ते। ततः ऋतम्भरायामुत्पन्नाः संस्काराः अन्यान् संस्कारान् बाधन्ते। ततः प्रज्ञाजन्य संस्कारैः क्लेशाः क्षीयन्ते। चित्तं च भोगान् निवर्तते। विवेकख्यातिपर्यन्तं चित्तं तिष्ठति।[251]

---

249 योगदर्शनस्वामिनाराणयभाष्यम् पृ. 85

250 योगामृतम् पृ. 134

251 योगामृतम् पृ. 134

**असम्प्रज्ञातयोगः –**

असम्प्रज्ञातसमाधौ ज्ञाता, ज्ञानं, ज्ञेयम् इति त्रिपुटीभेद: न बुध्यते। यथा लवणं जले निक्षिप्तं जलमयो भवति तद्वदेव चित्तवृत्तयरचापि ब्रह्मणि लीना: जायन्ते। एष निरालम्बनो समाधि:। अस्मिन् समाधौ वृत्तय: न तिष्ठन्ति। वृत्तीनां विलीयमानत्वात् चित्तं पूर्णत: निरूद्धावस्थायां तिष्ठति। अस्य कारणं परवैराग्यमेव। अस्मिन् प्रज्ञासंस्काराऽपि न भवन्ति। एतस्यामवस्थायां द्रष्टा पुरुष: स्वस्वरूपे अवस्थितो भवति। आत्मसाक्षात्कारस्य इयमेवावस्था। अस्यावस्थायां चित्तं बीजरहितं ज्ञायते। अत अस्य निर्बीजसमाधि इति संज्ञा। असम्प्रज्ञातसमाधिरेव योगिनां चरमं लक्ष्यम्। एवमेव प्राप्य योगी कृतकृत्यतामनुभवति। जीवात्मपरमात्मनो: ऐक्यं समत्वं वा अस्मिन् समाधावेव भवति। एषा समाध्यवस्था कैवल्यम् इत्युच्यते। तदा पुरुष: स्वरूपमात्रज्योतिरमल: केवली भवति। असम्प्रज्ञातसमाधौ यदि प्रवेश: जायते तदनन्तरमपि समाधौ: निरन्तरम् अभ्यास आवश्यक:। इतरथा व्युत्थानं भवितुमर्हति। असम्प्रज्ञातदृष्टया सम्प्रज्ञातोऽपि व्युत्थानमेव। स्वामिनारायणभाष्यानुसारेण भवप्रत्ययेन उपायप्रत्ययेन इति उपायद्वयेन प्राप्तव्य असम्प्रज्ञात:। भवप्रत्ययो विदेहानां देवानां, प्रकृतिलयानां च योगिनां भवति। एतेषां जन्मनैव सम्प्रज्ञातसमाधे: प्रतीतिर्भवति। ते हि मानवजन्म सम्प्राप्य पुन:असम्प्रज्ञाताय प्रयतनते। उपायप्रत्ययो योगिनां भवति।

**श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम्।**[252]

इत्येते उपाया असम्प्रज्ञातप्राप्ते:। उपायप्रत्ययेन क्रमेण समाधिं पुष्टमान असम्प्रज्ञाताय कल्पते। इत्थं स्वामिनारायणभाष्ये समाधिस्ण्वरूपं प्रतिपादितं तत्र पातञ्जलयोगवार्तिक: तत्त्ववैशााद्या सह नास्ति महान भेद:।

---

[252] पातञ्जलयोगसूत्रम् 1/20

**स्वामिनायणभाष्यमाश्रित्य संयमस्वरूपविमर्शः –**

श्रीकृष्णवल्लभाचार्यस्वामिनारायणभाष्ये संयमस्य विषये कथितमस्ति यत् धारणाध्यानसमाधय इति त्रयमपि एकत्र-एकविषयकं सत् संयम इत्युच्यते, तेषां समुदायस्य 'संयमः' संज्ञा भवति। अष्टाङ्गेषु यानि यमनियमासनप्राणायामप्रत्याहारदीनि बहिरङ्गानि सन्ति तानि संयमपदवाच्यानि नैव, अतएव संयम इति पदे धारणाध्यानसमाधिसमुदायो ज्ञातव्यः।

**त्रयमेकत्र संयमः।**[253]

व्यासभाष्यस्यानुसारं संयम स्वरूपमस्ति-

**एकविषयाणि त्रीणि साधनानि संयम इत्युच्यते तदस्य त्रयस्य तान्त्रिकी परिभाषा संयम इति।**[254]

महाभारतेऽपि संयमस्वरूपं वर्णयन् भीष्मो वक्ति यत्संयमितिवक्ष्यमाणः पुरुषः पृथ्वीरापाग्निवाय्वाकाशबुद्धिरहङ्कारसम्बद्धानां सप्त धारणां साधयति।[255]

श्रीमद्भगवद्गीतायाः चतुर्थाध्याये संयमस्य विषये उक्तमस्ति यद् संयमाग्निषु श्रोत्रादीनीन्द्रियाणि जुह्वति प्रत्येकस्येन्द्रियस्य संयमो भिन्न भिन्न एव।

---

253 .योगदर्शनस्वामिनारायणभाष्यम् 3/4

254 व्यासभाष्यम् पृ.

255 महाभारत में योग विद्या। शन्तिपर्व 195/20

**श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति।**

**शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति।।**[256]

सर्वदर्शनमतानुसारं मनसः एकाग्र्यमेव, योगस्य तिसृणामवस्थानां प्रकटीकरणे यः समर्थः स एव संयमः।

**धारणाध्यानसमाधित्रयमन्तरङ्गसंयमपदवाच्यम्।**[257]

अभिज्ञानशाकुन्तले संयमस्यार्थो धार्मिकभक्तिस्तपस्साधना-दयाभावः करुणाभावश्च निगदितमस्ति।[258]

तत्र यमनियमासनप्राणायामप्रत्याहारादीनां योगाङ्गानां समूत्त्वात न संयमं संज्ञा भवति। धारणादिषु मनसि निवृत्ते सति संयमः निगद्यते। संयमस्य फलं किं भवतीति सूत्र भाष्यरूपेण श्रीकृष्णवल्लभाचार्येण उक्तम् -

**तज्जयात् प्रज्ञाऽऽलोकः।**[259]

तस्य संयमस्य जयात् विवेकख्यातेर्भवति। अनन्तरं बुद्धो आलोक्यते। यथा यथा संयमः स्थिरपदो भवति तथा समाधिः वैशारदी भवति। तदनन्तरं विवेकख्याति उत्पद्यते।

संयमस्योपयोग निगद्यति श्रीकृष्णवल्लभाचार्येन -

---

256 श्रीमद्भगवद्गीता 4/26

257 सर्वदर्शनम् 2/59

258 अभिज्ञानशाकुन्तलम् 3/19

259 योगदर्शनस्वामिनारायणभाष्यम् 3/5

## तस्य भूमिषु विनियोगः।[260]

संयमस्य स्थूलसूक्ष्मावलम्बभेदेन व्यवथितासु चित्तवृत्तिषु, विनियोगः कर्त्तव्यः, अधरोधरां चित्तभूमिं जित्वा तां तां च ज्ञात्वा उत्तरस्यां भूमौ संयमो विधेयः, न ह्यनात्मीकृताऽधरभूमिरुत्तरस्यां भूमौ संयमः कुवार्णः समाधिफलभाग् भवतीति। तत्र सवितर्के निर्वितर्के तस्य संयमस्य विनियोगः करणीयः। अनन्तरं सविचारे, ततः निर्विचारे विनियोगः कार्यः। ततो ईश्वरप्रणिधानं भवेदिति।

## तदपि बहिरङ्गं निर्बीजस्य।[261]

अनन्तरं धारणाध्यानसमाध्यात्मकं अन्तरङ्गं निर्बीजसमाधेः बहिरङ्गत्वं स्वीक्रियते। निरालम्बनस्याऽसम्प्रज्ञातस्य समाधेः, तदपि धारणाध्यानसमाधयत्रयं बहिरङ्गं भवति, यतः संयमो यथा सम्प्रज्ञात योगस्य साक्षात् सम्पादकस्तथा नाऽसम्प्रज्ञातयोगस्य, किन्तु सम्प्रज्ञातयोगद्वारवैति, बहिरङ्गत्वं साक्षात् सम्पादकत्वे सत्यङ्गत्वमिति।

---

260 .योगदर्शनस्वामिनारायणभाष्यम् 3/6

261 योगदर्शनस्वामिनारायणभाष्यम् 3/8